IJCRM



International Journal of Contemporary Research In Multidisciplinary

*Review Article*

# रामदयालुविरचिते सङ्केतनिधौ यात्रासम्बन्धप्रश्नविचार:

**लक्ष्मीकान्तनायकः**

शोधछात्र, ज्योतिषवास्तुविभागः, रा.सं. विश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः,भारतम्

**Corresponding Author:** * लक्ष्मीकान्तनायकः

**DOI:** https://doi.org/10.5281/zenodo.18199168

## शोधसार

अस्मिन् शोधनिबन्धे रामदयालुविरचितसङ्केतनिधौ स्थितमूलसिद्धान्तानां, महर्षिबादरायणप्रणीतप्रश्नविद्यायाः, वराहमिहिरकृतदैवज्ञवल्लभायाः, प्रश्नभूषण-प्रश्नशिरोमणि-प्रभृतिग्रन्थानां च मतानि समन्वयपूर्वकं विश्लेषणं कृतम्। यात्रासम्बन्धप्रश्नेषु प्रश्नलग्नस्य चर-स्थिर-द्विस्वभावराशिस्थितिम् आधारभूतत्वं प्रतिपादितम्। चरराशिस्थप्रश्नलग्ने शुभग्रहसंयोगे शुभदृष्टौ च शीघ्रगमनसिद्धिः, स्थिरराशिस्थे गमनाभावः, द्विस्वभावराशिस्थे विलम्बगमनागमनं च शास्त्रसम्मततया विवेचितम्। चन्द्रस्य पूर्णत्वं, बलं, शुभदृष्टिसंयोग इप्सितसिद्धेः प्रमुखं साधनम् इति दर्शितम्। वक्रग्रहस्थितेः यात्रानिषेधः, दुर्धरायोगे गमनागमनप्रतिबन्धकः, शनिगुरुदृष्टिभ्यां स्थिरलग्ने विघ्नोत्पत्तिः च सप्रमाणं प्रतिपादितम्। प्रवासिनः मार्गे सम्भाव्यमानरोगभयकष्टादियोगाः, प्रत्यागमनकालनिर्णयस्य विविधपद्धतयः, शत्रोः प्रवासागमननिर्णयः, दूरदेशगतस्य पुनरागमनलक्षणानि च सूत्रपद्यैः सह विवेचितानि। एवं सर्वेषां तत्त्वानां सम्यगवलोकनेन निष्कर्षोऽयं लभ्यते यत् यात्राप्रश्नेषु निर्णयः केवलं राशिस्थितिमात्रेण न, अपि तु ग्रहबल-दृष्टि-योग-वक्रत्व-कालगणनासमन्वितेन समग्रदृष्टिकोणेन एव करणीयः।

**Manuscript Information**

- **ISSN No:** 2583-7397
- **Received:** 12-11-2025
- **Accepted:** 26-12-2025
- **Published:** 09-01-2026
- **IJCRM:5**(1); 2025: 33-37
- **©2026, All Rights Reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

**How to Cite this Article**

लक्ष्मीकान्तनायकः. रामदयालुविरचिते सङ्केतनिधौ यात्रासम्बन्धप्रश्नविचार. Int J Contemp Res Multidiscip. 2026;5(1):33-37.

**Access this Article Online**

www.multiarticlesjournal.com

**शब्दकुञ्चिका** - यात्रासम्बन्धसामान्यप्रश्नस्य समाधानम्, गमनागमनस्य शुभाशुभफलम्, गमनागमनस्य प्रतिबन्धकयोगः, पुनर्गमनयोगः, दूरदेशगतः जनः केन प्रकारेण प्रत्यागमिष्यति इति विचारः, प्रवासिनः मार्गे भयरोगादियोगाः, प्रवासिनः प्रत्यावर्तनकालः, शत्रोः गमनागमनयोगनिर्णयः, प्रवासिनः अनिष्टयोगाः, प्रवासिनः अन्यदिग्गमनयोगः, अनुभवसिद्धः आगमनयोगः, प्रवासिनः शुभाशुभम् आगमनं च ज्ञानम्, यात्रालग्नतः आगमनकालनिर्णयः।


© 2026 लक्ष्मीकान्तनायकः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

## उपोद्घात

भारतीयज्योतिषपरम्परायां प्रश्नशास्त्रस्य विशेषमहत्वं वर्तते। यत्र जन्मविवाहयात्रावृष्टियुद्धहृतवस्त्वादीनां निर्णयो विधीयते। विविधप्रश्नेषु यात्रासम्बन्धप्रश्नविचारः मानवानां लौकिकजीवने अत्यन्तं महत्त्वपूर्णं स्थानं वहति। "गमनं भविष्यति न वा", "गमनस्य कालः कदा", "प्रत्यागमनस्य निश्चयः अस्ति वा", "मार्गे शुभाशुभफलप्राप्तिः कथं भविष्यति" इत्यादयः प्रश्नाः प्रायः सर्वेषां जनानां चिन्ताविषयाः भवन्ति। एतेषां प्रश्नानां समाधानार्थं प्राचीनैः आचार्यैः बहवः प्रश्नग्रन्थाः प्रणीताः। येषु **रामदयालुविरचितः 'सङ्केतनिधिः'** विशेषतया उल्लेखनीयः। यद्यपि संकेतनिधिः जातकगणितनिषेकप्रश्नादिविषयाणां सन्निवेशग्रन्थो भवति। परन्तु संकेतनिधौ अष्टमसंकेते विविधप्रश्नानां विचाराः वर्तन्ते। तत्र विषेशरूपेण यात्राप्रश्नस्य चर्चा अपि वर्तते।

### यात्रासम्बन्धसामान्यप्रश्नस्य समाधानम्-

यदा प्राश्निकः "मम गमनं भविष्यति वा ? यदि भविष्यति तर्हि कदा?" इति पृच्छति तर्हि विचारणीयः यत्- प्रश्नलग्नं चरराशिस्थं शुभग्रहयुक्तं शुभदृष्टं वा चेत् तर्हि शीघ्रमेव गमनं सिद्ध्यति। यदि केवलं चरराशिः स्यात् किन्तु अशुभग्रहसंयुक्तं भवेत् तर्हि गमनं भवति। किन्तु इप्सितसिद्धिर्न जायते। यदि प्रश्नलग्नं स्थिरराशिस्थं तर्हि न गमनं नागमनम्। यदि प्रश्नलग्नं द्विस्वभावराशिस्थं तर्हि गमनागमनं विलम्बेन भवति। इप्सितसिद्धिफलं चन्द्रस्य दृष्ट्यानुसारेण ज्ञेयम्। यदि बलिष्ठः पूर्णचन्द्रः शुभग्रहैः दृष्टो भवेत् तर्हि वाञ्छितसिद्धिः लभते।

**अनुयोगतनौ गमो द्रुतं चरभे सिद्धिरभीप्सिता शुभे।**
**स्थिरभे न गमागमो द्विभे सममत्रेन्दुदृशोऽनुगं फलम्॥**[i]

प्रश्नभूषणे उक्तं यत् - प्रश्नलग्नं चरराशिषु (१, ४, ७, १०) भवेत् तर्हि गमनं, आगमनं, भरणं, नष्टता, पराजयश्च भवति। द्विस्वभावराशिषु (३, ६, ९, १२) तत् मिश्रितफलम्। यदि शुभग्रहाणां दृष्टिर्भवेत् तर्हि शुभम्। चन्द्रः स्थिरराशौ वर्तते चेत् गमनादयः न सिद्ध्यन्ति। विलोमक्रमेण (द्विस्वभाव-स्थिर-चराः) यदि चन्द्रः चरराशौ भवेत् तर्हि गमनादयः भवन्ति, द्विस्वभावराशौ मिश्रितफलं वाच्यम्।

**तद्यत्ययं चरे लग्ने द्विस्वभावे तु मिश्रता।**
**शुभदृष्टया शुभं ज्ञेयं चन्द्राद्वा व्यत्ययेऽन्यथा॥**[ii]

महर्षिबादरायणकृतप्रश्नविद्यानुसारेण यदि चरराशिर्लग्नं भवेत् तत्र च शुक्रबृहस्पतिबुधसूर्येषु कोऽपि ग्रहः स्थितः तर्हि पृच्छकस्य यात्रा सम्भवति। यदि तेषु कोऽपि लग्ने न भवेत् तर्हि पृच्छकः मार्गमध्यादेव प्रत्यागच्छति। प्रश्नलग्नं स्थिरराशिर्भवेत् तं शनिः गुरुः वा पश्येत् तर्हि यात्रायां विघ्नं वाच्यम्। अर्थात् यात्रासम्भावना नास्तीत्यर्थः। उक्तयोगेन प्रवासिनः प्रत्यागमनप्रश्ने फलं न सिद्ध्यति।

**उदयगते चरराशौ भृगुगुरुबुधभास्करेषु चैकतरः।**
**गमनमुपदिशति पुंसां निवर्तनं वर्त्मनोऽन्यसंस्था वा॥**
**ग्रहयोः सौराङ्गिरसो पश्येदेकः स्थिरं समुद्यन्तम्।**
**गमनं गन्ताऽऽगमन नास्तीति वक्तव्यम्।**[iii]

सङ्केतनिधौ प्रश्नलग्ने चरराशिस्थे शुभग्रहयुक्ते शुभदृष्टिसंयुक्ते वा भवेत् तर्हि शीघ्रमेव गमनमुक्तम्। परन्तु बादरायणः अत्र अधिकत्वेन सूर्यं समावेशितम्। उक्तेषु ग्रहेषु बुधगुरुशुक्राः निर्विवादरूपेण शुभदाः। प्रश्नलग्ने ते यदि स्थिताः यात्रा सफलं प्राप्नोति। सूर्यः सामान्यतः प्रशस्तो न मन्यते। परन्तु सः यात्रायां स्थिरकारकः ग्रहः। तस्मात् अत्र सूर्यः प्रशस्तः। यात्राप्रश्ने बुधबृहस्पती लग्नस्थौ चेत् विजयकीर्तिसुखदौ। यथा- "लग्ने कीर्तिसुखानिवृद्धिविजयान् प्राप्नोति वित्तं धने"[iv]। शुक्रस्तु विशेषफलदायकः यथा- "वेश्यार्थाम्बरमाल्यभोजनसुखप्राप्तिर्विलग्ने भृगौ"।[v]

प्रसङ्गेऽस्मिन् वराहमिहिरः दैवज्ञवल्लभायां शनिम् अपि स्वीकरोति। पुनः एतेषां ग्रहाणां वक्रत्वे यात्रा न सम्भवति इति प्रवदति। यथा-

**सूर्यसौरिगुरुसौम्यसितानामेकोऽपि चरलग्नगतश्चेत्।**
**आशुतर्हिगमनं स्पृहणीयं वक्रतामुपगतस्तु नहीति॥**[vi]

### गमनागमनस्य शुभाशुभफलम्-

यदि षष्ठदशमलग्नेषु पापग्रहाः स्युः तर्हि अशुभं फलम्। उक्तस्थानेषु पापग्रहः उच्चंगतः भवेत् तर्हि अल्पम् अशुभफलं वाच्यम्।

"गतोऽसौ कदा प्रत्यागमिष्यति"? इति निरुपणार्थं बृहस्पतिशुक्रौ वा द्वितीयतृतीयस्थौ भवेताम् तर्हि शीघ्रमेव आगमनम्। प्रश्नसमये चतुर्थस्थौ जीवशुक्रौ वलिचन्द्रेण दृष्टौ भवेताम् तर्हि सुखसहितमागमनम्।

**स्मरकर्मतनुष्वसद्ग्रहे न शुभं तुङ्गगते तदल्पता।**
**धनविक्रमगौ गतागमः सुखगौ स्विन्दुदृशा गुरू स सन्॥**[vii]

आचार्यभटोत्पलेन षष्ठस्थानगतपापग्रहः शुभफलं ददातीति उक्तः। यथा - **केन्द्रत्रिकोणसंस्थाः सौम्याः पापास्त्रिषष्ठलाभेषु।**
**संस्था सिद्धिं ब्रूयात्कार्याणां प्रोषितागमनम्॥**[viii]

आचार्यश्रीपतिः अपि एतत् स्वीकृरोति। यथा -
**केन्द्रोपगा नवमपञ्चमगाश्च सौम्याः**
**केन्द्राष्टवर्ज्यमशुभास्त्रिषडायसंस्थाः।**
**सर्वार्थसाधनकराः परिपृच्छतां स्युरेभिर्विपर्ययगुणैस्तु विपर्ययः स्यात्।।**[ix]

"गतोऽसौ कदा प्रत्यागमिष्यति"? इति निरुपणार्थम् आचार्यबादरायणः सङ्केतनिधेः मतं स्वीकरोति। यथा -
**दुश्चिक्यधनसमेतौ गुरुशुक्रावागमं नृणाम्।**
**बन्धूपगतावेतौ गृहप्रवेशं क्षणात्कुरुतः॥**
**लग्नाद् द्विद्वादशगौ चन्द्राद्वा चन्द्रपुत्रभृगुपुत्रौ।**
**मरणं लब्ध्वागमनं नास्तीति विनिर्दिशेत्प्रष्टुः॥**[x]

पण्डितजीवनाथस्य मतेन गुरुः, शुक्रः, चन्द्रः वा कश्चिदपि एकः ग्रहः यदि प्रश्नलग्नात् चतुर्थस्थाने स्थितः तर्हि प्रवासी शीघ्रं गृहमागच्छति। यथा-
गुरुशुक्रौ द्वितीये वा तृतीये प्रश्नलग्नतः। तदा गृहागतं विद्यात्पथिकं नात्र संशयः॥
**जीवो वा भार्गवो वाऽपि चन्द्रो वा सुखवेश्मनि। पथिकं गृहमायान्तं जानीयात्प्रश्नवित्तदा॥**[xi]


© 2026 लक्ष्मीकान्तनायकः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

**गमनागमनस्य प्रतिबन्धकयोगः** –

लग्नचन्द्रसप्तमेषु दुर्द्धरायोगः स्यात् तर्हि गमनागमनं न इति। यदि प्रश्नलग्नं चरराशिस्थं सुभग्रहयुक्तं चन्द्रेण दृष्टं स्यात् तर्हि शीघ्रं प्रत्यागमनं भवेत्।

**तनुचन्द्रमदेषु दुर्द्धरा यदि न स्तोऽत्र नृणां गमागमौ।**
**सशुभे चरलग्न इन्दुदृग्युजि गन्ता पुनरेत्यप्तौ त्वरा॥**[xii]

चन्द्रेण समुत्पन्नाः अनफा–सुनफा–दुरुधरा–केमद्रुमयोगाः ज्योतिषशास्त्रे प्रसिद्धाः। तेषु दुरुधरयोगः अत्र उपयुज्यते। यद्यपि अयं योगः सूर्यं विहाय अन्येन केनापि ग्रहाणां भवितुम् अर्हति, तथापि वादरायणस्य मतेन लग्नात् वा चन्द्रात् केवलं शुभग्रहैः एव निर्मितः दुरुधरयोगः अत्र गृहीतः। अतः स्पष्टं यत् प्रश्नलग्नात् चन्द्रस्य पूर्वापरभावयोः यदि शुभग्रहाः स्युः तर्हि यात्रा न सिद्ध्यति। वादरायणेन सप्तमभावोत्पन्नदुरुधरायोगः न गृहीतः। यथा -

**शुभदा दुरुधरयोगे गमनं पुरुषस्य नास्ति रोधोऽस्ति ।**
**अथवा गमनागमने गतस्य योगे च तद्वाच्यम्॥**[xiii]

**पुनर्गमनयोगः –**

चरराशिस्थप्रश्नलग्ने वक्रीदोषरहितः सूर्यः, शनिः, बुधः, शुक्रः वा एतेषु कोऽपि बलयुक्तः ग्रहः स्थितः तर्हि गमनं शीघ्रम्। स्थिरराशिस्थप्रश्नलग्नं शनिगुरुभ्यां दृष्टं चेत् तर्हि गमनं न इति वाच्यम्। शनिः, बुधः, सूर्यः, शुक्रः वा एतेषु कोऽपि वक्रीग्रहः लग्नस्थः भवेत् चेदपि गमनं न भवति।(*सूर्यस्य वक्रत्वं नास्ति*)

**यदि कोऽपि चरेऽङ्गऐनिविद्रविशुक्रेष्वृजुषु द्रुतं गमः।**
**स्थिरभेऽर्कजजीवदृग्युते न गमः स्यादनृजुष्वपि क्वचित्॥**[xiv]

वराहमिहिरस्य दैवज्ञवल्लभायामपि एतत् योगस्य सामान्यभेदः वर्तते। तत्र गुरुमपि अस्मिन् वर्गे संनिविष्टम्। यथा –

**सूरसौरिगुरुसौम्यसितानामेकोऽपि चरलग्नगतश्चेत्।**
**आशुतर्हिगमनं स्पृहणीयं वक्रतामुपगतस्तु नहीति॥**[xv]

**दूरदेशगतः जनः केन प्रकारेण प्रत्यागमिष्यति इति विचारः –**

यदि प्रश्नजातके केन्द्रस्थानानि पापग्रहसंबन्धरहितानि स्युः, एकादशे दशमे लग्ने च शुभग्रहाः विराजमानाः भवेयुः, चन्द्रः अष्टमभावे च स्थितः तर्हि परदेशंगतः जनः सुखलाभेन सह स्वगृहं प्रत्यागमिष्यति।

**विखलेषु चतुष्टयेषु सत्सद्वितास्वायनभस्तनुष्वपि।**
**उड्डुपे निधने प्रवासवान् सुखलाभैः स्वगृहानुपेत्ययम्॥**[xvi]

सप्तमः षष्ठः वा भावः ग्रहयुक्तः, बृहस्पतिः केन्द्रे तर्हि अतिदूरंगतः प्रवासी स्वगृहं प्रत्यागमिष्यति। नवमे पञ्चमे वा भावे बुधशुक्रौ स्थितौ, सप्तमे चतुर्थे वा भावे चरराशिस्थितः चन्द्रः विराजते तर्हि प्रवासी मार्गे अस्ति इति कथयेत्।

**मदेऽरिभे वा सखगे च केन्द्रगे गुरौ प्रवास्येति गृहांश्चिराद्गतः।**
**त्रिकोणगज्ञास्फुजितोरपि स्मरांबुगे चरेऽब्जे पथिकः पथीरितः॥**[xvii]

**प्रवासिनः मार्गे भयरोगादियोगाः-**

प्रश्नलग्नात् नवमस्थाने शनिः पापग्रहेण युक्तः दृष्टो वा तर्हि प्रवासिनः रोगः वाच्यः। शनिना दृष्टौ चन्द्रसूर्यौ अष्टमे भावे स्थितौ तर्हि प्रवासिनः रोगः वाच्यः। अष्टमभावः बलवानशुभग्रहेण दृष्टः चेत् अधिकं भयम् नेति। अष्टमे भावे बुधशुक्रौ स्थितौ चेत् शुभकारकौ भवतः। अष्टमभावे शनिभौमौ स्थितौ तर्हि अशुभफलं वाच्यम्।

खलेक्षिताढ्ये नवमे यमे रुजा यमेक्षितार्कोडुपयोर्मृतौ तथा ।

**न सदृशा भीः पाथ वाथ वित्सितौ शुभौ मृतिस्थौ न शुभौ कुजार्कजौ॥**[xviii]

**प्रवासिनः प्रत्यावर्तनकालः –**

सप्तमभावस्याधिपः यदा वक्री भविष्यति तदा सः प्रवासी विदेशात् प्रत्यागमिष्यति। अथवा प्रश्नलग्नात् यस्मिन् भावे बलिष्ठः ग्रहः स्थितः तत् भावसंख्याके मासे प्रवासी प्रत्यागमिष्यति। "यात्रातः प्रत्यावर्त्तितः प्रवासी कदा गृहम् प्राप्स्यति" ? इति निरूपणार्थं - बलिष्ठग्रहः प्रश्नलग्नात् यस्मिन् भावे स्थितः तत् भावसंख्यां द्वादशगुणीक्रियते। तल्लब्धसंख्यामितदिने प्रवासी गृहमागमिष्यति इति।

अत्र ज्ञातव्यं यत् "प्रवासी यात्रातः प्रत्यावर्तिष्यते वा न" ? इति जिज्ञासायां सप्तमेशस्य वक्रत्वादि विचार्य निर्णयः कार्यः। पुनः "कदा प्रत्यावर्तिष्यति" ? इति प्रश्ने बलिष्ठग्रहस्य स्थितिं विचार्य निर्णयः कार्यः।

**वक्रे मदेशे गमनान्निवर्त्तनं बली ग्रहो यत्र तनोस्तदुन्मितैः।**
**मासैरथाङ्गाद्यतमेऽस्ति भे ग्रहस्तद्घ्नार्कतुल्यद्युभिरागमो गृहे।।**[xix]

**वि.द्र.-** प्रश्नशिरोमणिग्रन्थे अपि सप्तमभावस्याधिपः वक्रंगते प्रवासी

आगमिष्यतीति उक्तं वर्तते। यथा –

**यदा सप्तमपो वक्री खेटो भूयात्तदागमः। इह नक्षत्रवक्रेण ग्रहवक्रं विचारयेत्।।**[xx]

प्रश्नभूषणे प्रश्नलग्नात् आगमनकारकग्रहः यस्मिन् संख्याके भावे स्थितः तत्संख्यां द्वादशगुणीकृत्य लब्धसंख्यामितदिने प्रवासी गृहमागमिष्यति इति उक्तम्। यथा-

**लग्नाद्यत्प्रमिते खेटस्तेन द्वादशसंङ्गुणाः। तैरेव दिवसैर्ज्ञेयं तदागमनमादिभिः।।**[xxi]

**शत्रोः गमनागमनयोगनिर्णयः** –

प्रश्नकाले चतुर्थभावे सूर्यचन्द्रौ स्थितौ चेत् प्रवासिनः शत्रोः च आगमनं न भविष्यति। तस्मिन्नेव भावे शुक्रः, बुधः, बृहस्पतिश्च स्थिताः स्युः तर्हि प्रवासी शत्रुश्च आगमिष्यतः। प्रश्नलग्नं स्थिरराशिः स्यात् तथा च चन्द्रः द्विस्वभावराशिस्थः तर्हि शत्रुः प्रत्यागमिष्यति। प्रश्नलग्नं स्थिरः स्यात् किन्तु चन्द्रः चरराशिस्थः तर्हि शत्रोः आगमनं वाच्यम्।

**सूर्येन्दुभ्यां नागमो बन्धुगाभ्यां शुक्रज्ञेज्यैरागमः पान्थशत्र्वोः।**
**व्यङ्गेऽब्जे चाङ्गे स्थिरेऽरेर्निवृत्तिर्लग्नेऽगे चेन्दौ चरे चागमोऽरेः॥**[xxii]

**"बहुकालात् गतोऽपि प्रवासी वा शत्रुः आगमिष्यति वा *?*" इति विचारः** -द्वितीयतृतीयपञ्चमभावेषु वा ग्रहाः स्थिताः चेत् बहुकालो गतोऽपि पुरुषः प्रत्यागमिष्यति। तेषु भावेषु शुभग्रहाः स्युः तर्हि चोरितधनं नष्टधनं वा पुनः प्राप्यते इति वक्तव्यम्। यदि पूर्वोक्तेषु भावेषु शुक्रगुरू स्थितौ स्याताम् तर्हि प्रवासी शत्रुश्च शीघ्रमेव प्रत्यागमिष्यतः।


© 2026 लक्ष्मीकान्तनायकः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

एवं च पणफरस्थाने बलिष्ठग्रहः स्यात् तदा तयोः प्रत्यागमनं भवति इति वक्तव्यम्।

**ग्रहैर्द्धनभ्रातृसुतस्थितैश्चिराङ्गतागमो नष्टधनाप्तिरुत्तमैः।**
**सिताचिताभ्यां द्रुतमागमश्चतुष्टयाद्वितीयं च गते ग्रहेऽपि सः।।**[xxiii]

**प्रवासिनः अनिष्टयोगाः –**

प्रश्नलग्नात् नवमभावे स्थितः शनिः पापग्रहैः युतो दृष्टो वा स्यात् तर्हि प्रवासी रोगग्रस्त इति वाच्यः। पापयुतः पापदृष्टः शनिः अष्टमभावे स्थितः तर्हि मृत्युदायकरोगः जायते।

युतेक्षितश्चेन्न शुभैश्च दिष्टगः शनिस्तनोस्तर्हि रुजा प्रवासिनः।[xxiv]

**प्रवासिनः अन्यदिग्गमनयोगः –**

अष्टमभावस्थसूर्यः शुभग्रहैः युक्तः दृष्टः स्यात् तर्हि प्रवासी देशदेशान्तरं प्रयाति।

**स चेन्मृतौ मृत्युकरोऽथसद्युतेक्षितेरवावष्टमगेऽन्यदिग्गतिः॥**[xxv]

**अनुभवसिद्धः आगमनयोगः-**

प्रश्नलग्नात् यद्भावे चन्द्रराशिः स्यात् तद्भावसङ्ख्याकदिनेषु शत्रोः वा प्रवासिनः आगमनं वाच्यम्। यदि लग्नद्वितीयपञ्चमसप्तमदशमेषु शुभग्रहाः स्थिताः तर्हि शुभफलकारकाः भवन्ति। परन्तु लग्ने स्थितः चन्द्रः अशुभं, दशमे शुभम् इति।

**यावत्तनोरिन्दुभमागमो दिनैस्तावद्भिरन्तर्यदि न ग्रहोऽपरः ।**
**मदस्वखांगाक्षगताः शुभाः शुभास्तनौ न चन्द्रः शुभदः शुभः खगः॥**[xxvi]

**प्रवासिनः शुभाशुभम् आगमनं च ज्ञानम् –**

प्रश्नकर्त्रा उच्चारिताक्षराणि षड्गुणीकृत्य तेषु एकं संयोजयेत्, ततः सप्तघातं कृत्वा शेषाङ्कं विलोक्य फलम् वदेत्। शेषः एकः चेत् तर्हि प्रवासी आगन्तुमिच्छति। यदि द्वौ भवेताम् सः मार्गमध्ये स्थितः। त्रयः चेत् सः ग्रामसमीपे अस्ति। चत्वारः चेत् सः गृहे परिवारसहितः अस्ति। यदि पञ्च भवेत् तर्हि प्रवासी रोगग्रस्तः। षट् चेत् तर्हि सः पीडितः। सप्ते सः आगमनाय यत्नं करोति। यदि धनेशो वक्री न स्यात् तर्हि प्रवासी कुशली वर्तते इति ज्ञेया।

**प्रश्नाक्षराण्यरिहतानि सकूनि तष्टान्यश्वैः प्रवासिफलमेकत आयियासुः।**
**अर्द्धे पथोऽस्य निकटेऽथ गृहे सलाभो रोग्यार्त्त आगमपरः शमृजौ स्वपे स्यात्॥**[xxvii]

**यात्रालग्नतः आगमनकालनिर्णयः –**

प्रश्नकालिकलग्नचन्द्रयोः अंशान्तरे यात्राकालिकलग्नस्य अंशं गुणित्वा तत् गुणनफलम् त्रिंशद्भिः भक्तम्। लब्धिः आगमनमासः। तत्र अंशकलादिकः शेषः यथाक्रमेण अंशानुसारेण दिनं, कलाप्रमाणं धटीका, विकलाप्रमाणं विघटीका च ज्ञेया।

विलग्नचन्द्रान्तरभागनिघ्नं यात्राविलग्नं खगुणैर्विभक्तम् ।
आयाति गन्ता खलु लब्धमासैर्दिनैर्घटीभिश्च यथाप्रमाणम् ॥[xxviii]

**उपसंहारः** - सङ्केतनिधौ यात्रासम्बन्धप्रश्नविचारः अत्यन्तं व्यवस्थितः, सूक्ष्मः, व्यवहारोपयोगी चास्ति। अस्मिन् ग्रन्थे यात्रायाः सम्भावना, तस्या कालः, मार्गे प्राप्तव्यं सुखदुःखरोगभयादि, प्रत्यागमनस्य निश्चय इत्यादिविषयाः शास्त्रीयदृष्ट्या निरूपिताः। संकेतनिधौ कथितविषयाः महर्षिबादरायणभटोत्पलवराहमिहिरादीनां मतैः सह सामञ्जस्यं वहति। अद्यतनपरिस्थितौ यदा मनुष्यः यात्राविषये अनिश्चितमनुभवति, तदा अयं शास्त्रीयः प्रश्नविचारः निर्णयसहायकः भवितुं शक्नोति।

## सन्दर्भ


[i] संकेतनिधिः/ अष्टमसंकेत/श्लोकाङ्कः. ३४
[ii] प्रश्नभूषणम्/ ४/ १७
[iii] प्रश्नविद्या/ १/ ४४,४५
[iv] प्रश्नमार्गः/ २४/१८५
[v] प्रश्नमार्गः/ २४/१६२
[vi] दैवज्ञवल्लभा/५ /२
[vii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः३५
[viii] प्रश्नज्ञानम्/ प्रथमाध्यायः / १८
[ix] प्रश्नज्ञानं/ रञ्जन प्रकाशन, प्रथमसंस्करण/ पृ.४२
[x] प्रश्नज्ञानं/ प्रथमाध्यायः/ १९,२०
[xi] प्रश्नज्ञानं/ रञ्जन प्रकाशन, प्रथमसंस्करण/ पृ.४३
[xii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः३६
[xiii] प्रश्नविद्या/ १/ ४६
[xiv] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः३७
[xv] दैवज्ञवल्लभा/ ५ /२
[xvi] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः३८
[xvii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः३९
[xviii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४०
[xix] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४१
[xx] प्रश्नशिरोमणिः/ खेमराज कृष्णदासप्रकाशन, प्रथमसंसस्करण/ पृ. ३३
[xxi] प्रश्नभूषणम्/ चतुर्थाध्यायः/ १८
[xxii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४२
[xxiii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४३
[xxiv] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४४
[xxv] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४४
[xxvi] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४५



© 2026 लक्ष्मीकान्तनायकः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

[xxvii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४६
[xxviii] संकेतनिधिः/ अष्टमसंकेतः/श्लोकाङ्कः४७

**Creative Commons (CC) License**

This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–NonCommercial–NoDerivatives 4.0 International (CC BY-NC-ND 4.0) license. This license permits sharing and redistribution of the article in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and source. No modifications, adaptations, or derivative works are permitted under this license.

**About the corresponding author**



**लक्ष्मीकान्तनायकः** रा.सं. विश्वविद्यालये तिरुपतौ आन्ध्रप्रदेशे स्थिते ज्योतिषवास्तुविभागे शोधछात्रः अस्ति। तस्य अध्ययनक्षेत्रेषु ज्योतिषशास्त्रम्, वास्तुशास्त्रम्, प्राचीनभारतीयज्ञानपरम्परा, संस्कृतग्रन्थानां अध्ययनम् तथा आधुनिकशोधपद्धतयः प्रमुखतया समाविष्टाः।


© 2026 लक्ष्मीकान्तनायकः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/